শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রী-ৱেগাসেতুস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রী-ৱেগাসেতুস্তোত্রম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

একং ৱেগৱতীমধ্যে হস্তিশৈলে চ দৃশ্যতে।
উপাযফলভাৱেন স্ৱযং ৱ্যক্তং পরং মহঃ॥ ১ ॥

ঈষ্টে গমযিতুং পারম্ এষ সেতুরভঙ্গুরঃ।
যত্র সারস্ৱতং স্রোতো ৱিশ্রাম্যতি ৱিশৃঙ্খলম্॥ ২ ॥

জযতি জগদেকসেতুঃ
ৱেগৱতীমধ্যলক্ষিতো দেৱঃ।
প্রশমযতি যঃ প্রজানাং
প্রথিতান্ সংসারজলধিকল্লোলান্॥ ৩ ॥

ৱিভাতু মে চেতসি ৱিষ্ণুসেতুঃ
ৱেগাপগাৱেগৱিঘাতহেতুঃ।
অম্ভোজযোনের্যদুপজ্ঞমাসীত
অভঙ্গরক্ষা হযমেধদীক্ষা॥ ৪ ॥

চতুराননসপ্ততন্তুগোপ্তা
সরিতং ৱেগৱতীমসৌ নিরুন্ধন্।
পরিপুষ্যতি মঙ্গলানি পুংসাং
ভগৱান্ ভক্তিমতাং যথোক্তকারী॥ ৫ ॥

শ্রীমান্ পিতামহৱধূপরিচর্যমাণঃ
শেতে ভুজঙ্গশযনে স মহাভুজঙ্গঃ।
প্রত্যাদিশন্তি ভৱসঞ্চরণং প্রজানাং
ভক্তানুগন্তুরিহ যস্য গতাগতানি॥ ৬ ॥

প্রশমিতহযমেধৱ্যাপদং পদ্মযোনেঃ
শ্রিতজনপরতন্ত্রং শেষভোগে শযানম্।

www.prapatti.com

শরণমুপগতাঃ স্মঃ শান্তনিঃশেষদোষং
    শতমখমণিসেতুং শাশ্বতং ৰেগৱত্যাঃ॥ ৭॥

শরণমুপগতানাং সোযমাদেশকারী
    শমযতি পরিতাপং সংমুখঃ সর্ৱজন্তোঃ।
শতগুণপরিণামঃ সন্নিধৌ যস্য নিত্যং
    ৱরৱিতরণভূমা ৱারণাদ্রীশ্বরস্য॥ ৮॥

কাঞ্চীভাগ্যং কমলনিলযাচেতসোভীষ্টসিদ্ধিঃ
    কল্যাণানাং নিধিরৱিকলঃ কোপি কারুণ্যরাশিঃ।
পুণ্যানাং নঃ পরিণতিরসৌ ভূষযন্ ভোগিশয্যাং
    ৰেগাসেতুর্জযতি ৱিপুলো ৱিশ্বরক্ষৈকহেতুঃ॥ ৯॥

ৰেগাসেতোরিদং স্তোত্রং ৰেঙ্কটেশেন নির্মিতম্।
যে পঠন্তি জনাস্তেষাং যথোক্তং কুরুতে হরিঃ॥ ১০॥

॥ ইতি শ্রী-ৰেগাসেতুস্তোত্রম্ সমাপ্তম্॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৰেঙ্কটেশায ৰেদান্তগুরৱে নমঃ॥

www.prapatti.com